श्री सूर्य प्रातः स्मरण स्तोत्रं

श्री सूर्य प्रातः स्मरण स्तोत्रं

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं
रूपं हि मंडलमृचोऽथ तनुर्यजूंषि |
सामानि यस्य किरणाः प्रभवादिहेतुं
ब्रह्माहरात्मकमलक्ष्यमचिंत्यरूपं || 1 ||

प्रातर्नमामि तरणिं तनुवाङ्मनोभि-
-र्ब्रह्मेंद्रपूर्वकसुरैर्नतमर्चितं च |
वृष्टिप्रमोचनविनिग्रहहेतुभूतं
त्रैलोक्यपालनपरं त्रिगुणात्मकं च || 2 ||

प्रातर्भजामि सवितारमनंतशक्तिं
पापौघशत्रुभयरोगहरं परं च |
तं सर्वलोककलनात्मककालमूर्तिं
गोकंठबंधनविमोचनमादिदेवं || 3 ||

श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः |
स सर्वव्याधिनिर्मुक्तः परं सुखमवाप्नुयात् || 4 ||

इति श्री सूर्य प्रातः स्मरण स्तोत्रं |